**DIET MALAPPURAM & VIJAYABHERI MALAPPURAM**

**SSLC MODEL EXAMINATION , MARCH 2022**

SANSKRIT ( SET 2 )

TIME 1:30 hrs SCORE :40

**निर्देशा:** -

1. 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।

2. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।

3. प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

4. 1 - 24 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः ।

**I . प्रश्नानां प्रत्येकम् एकैकः अङ्कः ।**

**भागः 1.**

**( 1 - 6 ) चतुर्णां समुचितम् उत्तरं कोष्ठकात् चित्वा लिखत । ( 4X1=4)**

**1.** सुखदुःखयो: कर्ता कः

( आत्मानम्, शरीरम्, इन्द्रियाणि )

**2.** त्यागराज: किं कृत्वा जीवितं निनाय ?

( उञ्छवृत्तिं, भिक्षाटनं, नटनम् )

**3.** कृषकेन ताडितं वृषभं दृष्ट्वा का रुरोद ?

( सरमा , सुरभी, सुरसा )

**4.** मुरभित्कुटुम्बिनी का ?

( लक्ष्मी, काली, दुर्गा )

**5.** अव्यक्तपुष्पः कः ?

( वृक्षः, वनस्पतिः, ओषधिः)

**6.** ओक्स्फोर्ड् सर्वकलाशालायां पाठनाय इदंप्रथमतया गतः भारतीयः कः?

( महात्मागान्धी, बालगङ्गाधरतिलकः, डा. एस् राधाकृष्णः )

**भागः 2.**

**( 7- 9 ) प्रश्नानां प्रत्येकं एकैकः अङ्कः ।** **( 3X1=3)**

**7.** माघमहाकाव्यस्य नामान्तरं किम् ?

( कीचकवधम्, शिशुपालवधम् , दुर्योधनवधम् )

**8.** शकुन्तलादुष्यन्तौ केन विधिना परिणीतौ ?

( गान्धर्वविधिना, ब्रह्मविधिना, आसुरविधिना )

**9.** परेषाम् आलोकनार्थं किं न कुर्यात्?

( स्वधर्माचरणम्, हिंसाचरणम्, अधर्माचरणम् )

**II . प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।** **( 1X2=2)**

**भागः 1.**

**10. उदाहरणानुसारम् ऋते उपयुज्य वाक्यं परिवर्तयत ।**

उदा - भोजनाय पायसं नास्ति । अन्यत् सर्वम् अस्ति ।

भोजनाय पायसात् **ऋते** अन्यत् सर्वम् अस्ति ।

महानसे लवणं नास्ति । अन्यत् सर्वम् अस्ति ।

**भागः 2.**

**( 11- 12) प्रश्नानां प्रत्येकं द्वौ अङ्कौ । एकस्य उत्तरं लिखत ।** **( 1X2=2)**

**11. सूचनानुसारं गद्यक्रमं लिखतु ।**

इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ।।

इमां. . . . . . . . धियं अहं न वेद । . . . . . . विचित्ररूपा खलु । परां भवदापदं . . . . . . . मम चेतः आधयः. . . . . . . रुजन्ति ।

**12. श्लोकं पठित्वा अधोदत्तेभ्यः उचितम् आशयं चित्वा लिखत ।**

यदा पुन: प्रार्थयसे तदा गृहं
प्रविश्य बद्ध्वा च कवाटमेककः ।
कुरु स्वतातं प्रति याचनां रह:
पिता फलं दास्यति गुप्तदर्शकः ।।

i. धर्माचरणम् आत्मनिर्वृत्यर्थं एव भवेत् ।

ii. गुप्तदर्शकः पिता फलं दास्यति ।

iii. दक्षिणहस्तदत्ता भिक्षा वामकरेण मा ज्ञायताम् ।

**III. ( 13- 16) प्रश्नानां प्रत्येकं त्रयः अङ्काः । त्रयाणाम् उत्तरं लिखत । ( 3X3=9)**

**भागः 1.**

**13. i. उदाहरणानुसारं पदच्छेदं लिखत ।**

किम् + अवदत् - किमवदत् । ( एवं चेत्)

तम् + अवदत् - . . . . . . . . . . ।

**ii. उदाहरणानुसारं विग्रहं लिखत ।**

ज्ञाननिधिः - ज्ञानं निधिः यस्य सः । ( एवं चेत्)

गुणनिधिः - . . . . . . . . . ।

**iii. अधोदत्तवाक्यात् सम्बोधनापदं चित्वा लिखत ।**

" गच्छ वत्से! सर्वं भद्रं जायेत " सः ताम् एवम् असान्त्वयत् ।

**14.** पट्टिकां पूरयत ।

| कृतिः | विभागः | कर्ता |
|---|---|---|
| शङ्करदिग्विजयम् | . . . . . . . . . . . . . . . | माधवविद्यारण्यस्वामी । |
| कनकधारास्तोत्रम् | स्तोत्रकाव्यम् | . . . . . . . . . . . . . . . . |
| . . . . . . . . . | आयुर्वेदः | चरकः |

**15. समानार्थकपदानि चित्वा लिखत**

गृहम् -

लोलुपः -

तृप्तिः -

लुब्धः, तुष्टिः, भवनम्

**16. गद्यांशात् वाक्यानि स्वीकृत्य त्रीणि मुद्रावाक्यानि निर्मातु ।**

मानवः सस्यसंरक्षणे अतीव तात्पर्यं प्रकटयति ।वृक्षाः दशपुत्रसमाः इति चिन्तया ते वृक्षरोपणं कुर्वन्ति।वनसम्पत् मानवसम्पत् इति महत्वम् उद्घोषयितुम् अधुनातनकाले बहुविधानि प्रवर्त्तनानि प्रचालयन्ति ।सस्यानि प्राणवायुनिलयानि इति कथनं सार्थकमेव।अतः वृक्षसंरक्षणम् अस्माकं कर्त्तव्यमेव ।

| |
|---|
| उदा - " सस्यान् संरक्षतु " |
| .................. |
| ...................... |
| .................. |

**भागः 2.**

**प्रश्नानां प्रत्येकं त्रयः अङ्काः।** **( 1X3=3)**

**17. यथोचितं योजयत ।**

उक्त्वा - ल्यबन्तमव्ययम्

निलीय - तुमुन्नन्तमव्ययम्

गन्तुम् - क्त्वान्तमव्ययम्

**IV . ( 18- 20) प्रश्नानां प्रत्येकं चत्वारः अङ्काः ।प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।**

**भागः 1.** ( 2X4=8)

**18. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम् ।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा ।।

i. धन्यानामुत्तमं किम् ?

ii. श्लोकात् स्वास्थ्यं इत्यर्थकं पदं चित्वा लिखत ?

iii. तुष्टिरुत्तमा इति पदस्य पदच्छेदः कः ?

iv. अस्मिन् श्लोके क्रियापदं किम् ?

**19. सम्भाषणांशान् पूरयत ।**

देवेन्द्र: - वत्से ! ---------------- रोदिषि ?

सुरभि: - भो . . . . . . . . . . . ! मम पुत्रस्य दैन्यतां दृष्ट्वा विलपामि ।

देवेन्द्र: - पुत्रस्य किमभवत् ?

सुरभि - मम दुर्बलं पुत्रं कृषक: ---------- ।

देवेन्द्र: - सहस्राधिकपुत्रवती भवति किमर्थं अस्मिन् पुत्रे . . . . . . . . . . . . . प्रकटयति ।

सुरभि: - दुर्बले सुते अधिकवात्सल्यं मातृसहजा एव ।

देवेन्द्र: - चिन्ता मास्तु | सर्वं शुभं जायेत |

**20. सस्यसंरक्षणम् इति विषयमधिकृत्य सूचनानुसारं टिप्पणीं लिखत ।**

**सूचनाः -** वृक्षायुर्वेदः - सुरपालः - सर्वचराचराः प्रकृत्यंशाः- परस्पराश्रय- शुद्धवायुः- सस्यरोपणम्- परिस्थितिदिनम्- नास्ति सस्यम् अनौषधम् - - सस्यसंरक्षणप्रवर्त्तनानि ।

**भागः 2.**

**(21- 22) प्रश्नानां प्रत्येकं चत्वारः अङ्काः। प्रश्नेभ्यः एकस्य उत्तरं लिखत ।**

**(1X4=4)**

**21. महाकाव्यानां तथा तेषां कर्तृणां च नामानि यथोचितं योजयत ।**

| **महाकाव्यानि** | **कर्त्तारः** |
|---|---|
| किरातार्जुनीयम् | कालिदासः |
| शिशुपालवधम् | श्रीहर्षः |
| कुमारसंभवम् | भारविः |
| नैषधीयचरितम् | माघः |

**22. सूचनानुसारं शकुन्तलायाः स्वभावं निरूपयत ।**

**सूचनाः**- अभिज्ञानशाकुन्तले नायिका - कण्वमहर्षेः पालितपुत्री - सहजीविस्नेहं - दुष्यन्तं गान्धर्वविधिना परिणीतवती - शापेन परित्यक्ता - पतिस्नेहं - पतिगृहगमनम् ।

**V. प्रश्नानां प्रत्येकं पञ्च अङ्काः। प्रश्नेभ्यः एकस्य उत्तरं लिखत ।(1X5=5)**

**23. प्रादेशिकभाषायां विवर्तयत ।**

पाणिनि: संस्कृतभाषाया: महान् व्याकरणपण्डितः आसीत्। तेन विरचित: अष्टाध्यायी नामक: व्याकरणग्रन्थ: विश्वप्रसिद्ध: भवति। पाणिनि: व्याकरणपण्डितानां प्रात:स्मरणीय: मुनि: एव। न केवलं व्याकरणपण्डितानाम् अपि तु सर्वेषां संस्कृतपण्डितानाम् प्रथमगणनीयः इत्यत्र नैकोऽपि संशय:। पाणिने: जन्म क्रिस्तो: पूर्वं सप्तशताब्द्याम् अभवत्।

**24.** श्रीशङ्कराचार्येण विरचितं स्तोत्रकाव्यं भवति सौन्दर्यलहरी। तस्मिन् देवीस्तुतिः चारुतया काव्यरूपेण प्रतिपादिता। शिवस्य पत्न्याः स्तुतिरूपेयं कृतिः। तत्र शतं श्लोकाः विद्यन्ते। सौन्दर्यलहर्यां वेद- तन्त्र- मन्त्र- अलङ्कारशास्त्रादयः च अन्तर्भूताः वर्तन्ते।